# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-2** | **सत्रम् – 3** | **गुणाः - 70** |
| **विषयः – वेदः** | **प्रश्नपत्रम् - 7 - CE - 2.3.3** | **समयः- 8 तः 11** |
| **दिनाङ्कः- 16/10/2019** | **संदर्भग्रन्थः –** याज्ञनवल्क्यशिक्षा | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः ससन्दर्भं व्याख्या कार्या । 10**

1. शुक्लमुच्चं विजानीयान्नीचं लोहितमेव च ।
   श्यामन्तु स्वरितं विद्यादग्निमुच्चस्य दैवतम् ।।
2. समुच्चारयेद्वर्णान् हस्तेन च मुखेन च ।
   स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत्स्थितौ ।।
3. हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
   ऋग्यजुः सामभिर्दग्धो वियोनिमधिगच्छति ।।

**प्र-2 एकस्य सविस्तरमुत्तरं लिखत । 10**

1. उदात्तादि त्रिस्वरेषु कथम् अन्तर्भुक्ताः सप्तस्वराः वर्णयन् षड्जादिस्वराणाम् उच्चारणप्रकारं लिखत ।
2. वेदाध्ययनस्य विधिं प्रतिपाद्य वर्णोच्चारणसमये मुखहस्तयोः सामञ्जस्यम् आवश्यकम् इति वर्णयत ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः ससन्दर्भं व्याख्या कार्या । 10**

1. उदात्तं तु भ्रुवः प्रान्ते प्रचयं नासिकाग्रतः ।
   हृत्प्रदेशेऽनुदात्तं तुतिर्यग् जात्यादिरीरितः ।।
2. यथा बालस्य सर्पस्य निःश्वासोलघुचेतसः ।
   एवमूष्मा प्रयोक्तव्या हकारपरिवर्जिता ।
3. उच्चानुदात्योर्योगे स्वरितः स्वर उच्यते ।
   एक्यं तत्प्रचयः प्रोक्तः सन्धिरेष मिथोऽद्भुतः ।।

**प्र-4 एकस्य सविस्तरमुत्तरं लिखत । 10**

1. वकारादौ हस्तप्रदर्शने कथं कुत्र वा नयनं स्याद् ग्रन्थोक्तदिशा वर्णयत ।
2. कतिविधा उष्मा भवन्ति इत्युल्लिख्य उष्मणः स्वरूपभेदान् लिखत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः ससन्दर्भं व्याख्या कार्या । 10**

1. आकाशस्था यथा विद्युत् स्फुटिता मणिसूत्रवत् ।
   एषच्छेदो विवृत्तीनां यता बालेषु कर्त्तरी ।।
2. अवग्रहे पदच्छेद उदात्तो दृश्यते यदि ।
   स्वरान्तं स्वरितं प्राहुः सन्धौ तु स्वार्यते परम् ।।
3. वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः ।
   द्विमात्रिके मात्रिकः स्यात् संयोगाद्यश्च यो भवेत् ।।

**प्र-6 एकस्य सविस्तरमुत्तरं लिखत।** **10**

1. स्वरादीनां वर्णादिविचारम् उल्लिख्य वर्णानां दैवतानि लिखत।
2. ग्रन्थोक्तदिशा स्वरभक्तीनां वर्णनं सोदाहरणं कुरुत।

**प्र-7 दशानां लघुत्तराणि लिखत।** **10**

1. कति स्वराः के च ते
2. ब्राह्मणजातिः कस्य स्वरस्य भवति
3. भारद्वाजगोत्र कस्य स्वरस्यास्ति
4. षड्जादयः स्वराः कुत्र भवन्ति
5. ऋषभधैवतौ कस्मिन् स्वरे अन्तर्भुक्तौ
6. षड्जस्वरं कः वदति
7. निषादं कः ब्रूते
8. उद्दातस्य स्थितिस्थानं किम्
9. के त्रिविधा उष्माणः
10. स्वरितस्वरस्य कति भेदाः सन्ति
11. स्पर्शानां वर्णः कः
12. अकारादयः को जातिविशेषः
13. आख्यातस्य गोत्रं किम्
14. उपसर्गाणां गोत्रं किम्
15. पुल्लिङ्गकाः के स्मृताः

********************